11678

रामस्तोत्र

116/8

* श्रीः *

ीराम-सहस्रनाम



लेखक-

महाकवि स्वामी श्रीजयरामदेवजी महाराज, वृन्दावन।

प्रकाशक—

भार्गवपुस्तकालय, गायघाट, बनारस १.

ब्राञ्च-कचौड़ीगली, बनारस। [मूल्य ।)

महर्षि वाल्मीकि शोध संस्थान
11678
अयोध्या

❀ श्रीमते रामानन्दाय नमः ❀

श्रीरामसहस्रनाम

॥ ध्यानम् ॥

नवलनलिननीलं लोकलीलाललामं
मदनमधुरमूर्तिं रत्नसिंहासनस्थम् ।
विलुलितवनमालं सीतया शोभमानं
स्मितसुखमभिरामं नौमि राकेशरामम ॥ १ ॥

प्रेमोत्फुल्लमुखारविन्दमधुपं केशावलीसुन्दरम्
सर्वाङ्गे प्रियया प्रसूनरचनाश्रृङ्गारलीलामयम् ।
हस्ते पंकजपुष्पगुच्छलसितं विद्युल्लतावीक्षणम्
वैदेहीसहितं प्रमोदविपिने रामं व्रजन्तं भजे ॥ २ ॥

मारविन्दमकरन्दमिलिन्दमूर्तिं
कन्दर्पदर्पदमनं कमनीयकान्तिम् ।
श्रीजानकीवदनचन्द्रचकोररूपं
साकेतनाथमजितं सततं नमामि ॥ ३ ॥

❀ श्रीरामसहस्रनामप्रारम्भः ❀

लीलावतारिणं पूर्णं ब्रह्म ब्रह्मादिवन्दितम् ।
शान्तं सनातनं कान्तं वन्दे संसारकारणम् ॥ १ ॥
रामं रघुवरं श्यामं राघवेन्द्रं रमापतिम् ।
रसानन्दं रमानन्दं वन्दे मङ्गलमन्दिरम् ॥ २ ॥
रामचन्द्रं चिदानन्दं रम्यं राजीवलोचनम् ।
सीतापतिं गतिं गम्यं वन्दे विश्वात्मविग्रहम् ॥ ३ ॥

रामबीजं जगद्बीजं रामदेवं रमाद्भुतम् ।
रघुनाथं मनोनाथं वन्दे राकेशशीतलम् ॥ ४ ॥
कोमलं कमलाकान्तं कोशलेशं कृपामयम् ।
कल्याणं करुणागारं वन्दे कैवल्यदायकम् ॥ ५ ॥
काकुत्स्थं कमलेशं च कौशल्यानन्दनं हरिम् ।
केशवं देवदेवेशं वन्दे कन्दर्पसुन्दरम् ॥ ६ ॥
जगदीशं जगन्नाथं जगन्नाटकनायकम् ।
जगत्संपुटरत्नं च वन्दे ज्योतिर्मयं विभुम् ॥ ७ ॥
योगदं जगदाधारं जानकीशं जगत्पतिम् ।
जगद्गुरुं जगद्वंद्यं वन्दे योगीन्द्रजीवनम् ॥ ८ ॥
लीलामनोहरं बालं कौशल्यानन्दवर्धनम् ।
चापल्यवैभवं वन्दे क्रीडाचातुर्यसुन्दरम् ॥ ९ ॥
ललितं लक्ष्मणानन्दं शत्रुघ्नभरताग्रजम् ।
किशोरं भक्तहृच्चौरं वन्दे लीलाविलक्षणम् ॥ १० ॥
धनुर्धरं हयारूढं वीरेन्द्रं लक्ष्यसुन्दरम् ।
विद्युत्पुञ्जप्रभं प्राप्यं वन्दे वीथीविहारिणम् ॥ ११ ॥
कीर्त्तिमन्तं कलारम्यं मायेशं कौतुकालयम् ।
केलिशीलमतृप्तं च वन्देऽहं पितृलालितम् ॥ १२ ॥
चक्रवर्तिकुमारं च सर्वेशं छद्मरूपिणम् ।
विश्वाश्रयं श्रियःश्रेष्ठं वन्दे दशरथात्मजम् ॥ १३ ॥
विश्वमित्रं विशालाक्षं विश्वामित्रेण याचितम् ।
विद्याधरं महासौम्यं वन्दे मञ्जुलभाषिणम् ॥ १४ ॥

अचिन्त्यं चित्रकारं च चतुर्व्यूहं चतुर्भुजम् ।
चारुवेषं चिदात्मानं वन्दे चिन्ताविमोचनम् ॥ १५ ॥
ताटकात्रासनं त्राणं त्रैलोक्येशं त्रिविक्रमम् ।
तत्त्वाद्भुतं च तत्त्वेशं वन्दे त्रैलोक्यतारकम् ॥ १६ ॥
यज्ञरक्षणदक्षं च यज्ञभोक्तारमव्ययम् ।
सुबाहुसूदनं वन्दे मारीचमतिमन्थनम् ॥ १७ ॥
तरुणं तारणे दक्षं पूज्यं पतितपावनम् ।
अहल्योद्धारकं देवं वन्दे दीनार्त्तिदारणम् ॥ १८ ॥
ज्योतिर्मूर्तिं जगन्मूर्तिं जाह्नवीजन्मदायकम् ।
अजेयं सर्वविज्ञेयं वन्दे राजेन्द्रनन्दनम् ॥ १९ ॥
सीतास्वयंवरे वन्द्यं श्रीमन्तं श्रीसुधाम्बुधिम् ।
विदेहस्य मनश्चौरं वन्दे माधुर्यमन्दिरम् ॥ २० ॥
सीतापुष्पवने मुग्धं सीतासौन्दर्यमोहितम् ।
सीतामुग्धिकरं दिव्यं वन्दे सौन्दर्यसागरम् ॥ २१ ॥
सीताप्रेमसुधातृप्तं सीतासीतांशुशिल्पिनम् ।
दिव्यानन्दवनं वन्दे दिव्यमाल्यैरलंकृतम् ॥ २२ ॥
काकपक्षधरं धीरं मिथिलादर्शकं कलम् ।
शतानन्दशतानन्दं वन्दे दीप्ताङ्गशालिनम् ॥ २३ ॥
मोदमूलं मनोमूलं महामन्मथमन्मथम् ।
मनोज्ञं मनसातीतं वन्दे संसाररञ्जनम् ॥ २४ ॥
भर्त्तारं भुवनाधारं धनुर्यज्ञे धनुर्धरम् ।
पुरुषं पुण्डरीकाक्षं वन्दे पुण्यं पुरातनम् ॥ २५ ॥

ब्रह्माण्डपालकं श्रीदं श्रीशं वीर्यवतां वरम् ।
ब्रह्माण्डमण्डनं वन्दे चण्डकोदण्डखण्डनम् ॥ २६ ॥
किशोरललितं नित्यं नीलेन्दीवरसुन्दरम् ।
तेजोमयं तपःपुञ्जं वन्दे कौशेयवाससम् ॥ २७ ॥
जानकीहृदयोल्लासं जानकीप्राणवल्लभम् ।
जगद्वीरेन्द्रविख्यातं वन्दे वीरं जगज्जयम् ॥ २८ ॥
जानकीहृदये हारं जयमालाविभूषितम् ।
सीताप्रेमसुधामग्नं वन्दे सीतामनोहरम् ॥ २९ ॥
नवदूर्वादलश्यामं कामं नीलमणिप्रभम् ।
पीताम्बरधरं वन्दे वनमालाविभूषितम् ॥ ३० ॥
बिम्बाधरं सुधासिक्तं नासामुक्तामनोहरम् ।
दिव्याकृतिरसं वन्दे दिव्यालंकारभूषितम् ॥ ३१ ॥
पुष्पहासं सरोजाक्षं कैशोरामृतवर्षिणम् ।
कैशोराद्भुतमाधुर्यं वन्दे लावण्यनिर्झरम् ॥ ३२ ॥
बिभ्रन्नूपुरपादाब्जं भव्यं भूषणसुन्दरम् ।
रूपामृतघनं भूपं वन्दे चन्दनचर्चितम् ॥ ३३ ॥
भूषणाद्भुतश्रृङ्गारं रत्नरागैश्च रञ्जितम् ।
किरीटिनं सुधाकण्ठं वन्दे कौस्तुभधारिणम् ॥ ३४ ॥
विदेहहृदयानन्दं विदेहमहिषीप्रियम् ।
रूपरत्नं रसाक्रान्तं वन्दे ज्ञानतरोः फलम् ॥ ३५ ॥
सुबोधं क्रोधहन्तारं जितक्रोधं बृहद्बलम् ।
जामदग्न्यजितं वन्दे विष्णुं पूर्णावतारिणम् ॥ ३६ ॥

महर्षि वाल्मीकि शोध संस्थान

जामातरं विदेहस्य विवाहे मण्डपस्थितम् ।
सीतया शोभितं वन्दे मधुरं जानकीवरम् ॥ ३७ ॥
कामेशं कमनीयं च कौसल्याप्रेमलालितम् ।
अयोध्याप्रकृतिप्राणं वन्दे भद्र भवार्दनम् ॥ ३८ ॥
सीतासुधानिधिं स्निग्धं शीतांशुसदृशाननम् ।
सीताविहारिणं विज्ञं वन्दे सीतासुकोमलम् ॥ ३९ ॥
छविमूलं क्षमामूलं क्षीरनीरेशवासिनम् ।
सूक्ष्मं वेदमयं वन्दे निर्मानं सर्वनिस्पृहम् ॥ ४० ॥
सर्वसद्गुणसम्पन्नं चक्रवर्तिमनोहरम् ।
मायापतिं त्रपाशीलं वन्दे देवर्षिवन्दितम् ॥ ४१ ॥
भूमानं भवभूमानं देवाधारं दयानिधिम् ।
सर्वदैकरसं वन्दे कानने गमनोत्सुकम् ॥ ४२ ॥
विजनं विजितात्मानं सत्यानन्दं सदात्मकम् ।
जानकीरत्नवारीशं वन्दे सर्वजगत्प्रियम् ॥ ४३ ॥
सत्याश्रयं च सत्याप्तं सुयानं वंशभूषणम् ।
सत्येशं सरलं वन्दे धर्मोद्धारार्थतत्परम् ॥ ४४ ॥
धर्मप्राणं धराधारं धर्माङ्गं धर्मवत्सलम् ।
धर्मालयं धर्मरूपं वन्दे धर्मधुरन्धरम् ॥ ४५ ॥
प्रजानाथं महानाथं निश्चलं पितृवत्सलम् ।
निषादसुहृदं वन्दे सुमन्तसुमतिप्रदम् ॥ ४६ ॥
परेशं परमोदारं चरणोदक-दायकम् ।
निषादनिबिडानन्दं वन्दे भक्तपराजितम् ॥ ४७ ॥

गतद्वन्द्वं मुकुन्दं च प्रतिज्ञापरिपालकम् ।
भारद्वाजप्रियं वन्दे वाग्मिवाल्मीकिवन्दितम् ॥ ४८ ॥
कमलाकोमलाङ्गं च वल्कलाम्बरधारिणम् ।
जटाजूटधरं वन्दे चित्रकूटाद्रिचारिणम् ॥ ४९ ॥
कन्दमूलाशिनं केशं वनेशं वनवासिनम् ।
दिव्यकेलिनिधिं वन्दे ज्योतिष्पारं परात्परम् ॥ ५० ॥
बन्धुप्रेमार्णवे मग्नं भावेशं भरताश्रयम् ।
प्रेमाकुलं ध्रुवं वन्दे प्रजेशं पादुकाप्रदम् ॥ ५१ ॥
सत्यात्मकं समं सर्वं समाधारं समावृतम् ।
वैराग्यविग्रहं वन्दे तापघ्नं च तपोनिधिम् ॥ ५२ ॥
स्रग्विणं छविपर्जन्यं किरातानां सुखप्रदम् ।
प्रेमावतारिणं वन्दे सानुक्रोशास्मितेक्षणम् ॥ ५३ ॥
कानने रममाणं च मन्दाकिन्यां विहारिणम् ।
नित्योत्सवं नवं वन्दे वैदेहीरागरञ्जितम् ॥ ५४ ॥
पुष्पवत्सुकुमारं च पुष्पशृङ्गारकारिणम् ।
श्रमितं पुष्पभारेण वन्दे सीताविमोहनम् ॥ ५५ ॥
जयन्तस्य जयन्तं च जानकीप्रेमजीवनम् ।
वीररूपं जगद्भूपं वन्दे दुष्टविमर्दनम् ॥ ५६ ॥
अत्रिवंद्यं बृहद्गर्भं ब्रह्मगर्भं प्रवर्तकम् ।
अनुसूयाप्रियं वन्दे दत्तात्रेयं सुरार्चितम् ॥ ५७ ॥
चिद्घनं चिन्तनीयं च चन्द्रकोटिनिभाननम् ।
चित्रकूटपतिं वन्दे चैतन्यं चित्तकर्षणम् ॥ ५८ ॥

विराधवधकर्त्तारं शरभङ्गगतिप्रदम् ।
विश्वेशनायकं वन्दे विश्वनाटकवैभवम् ॥ ५९ ॥
सुतीक्ष्णहृदयेशं च प्रेमाकाशविभाकरम् ।
प्रेममूर्त्तिं परं दिव्यं वन्दे प्रेमलताफलम् ॥ ६० ॥
प्रेमार्णवं परात्मानं प्रेमरत्नपरीक्षकम् ।
प्रीतिकान्तं परं कान्तं वन्दे पुष्करलोचनम् ॥ ६१ ॥
अगस्त्यानन्ददातारं दिव्याङ्गं देवसुन्दरम् ।
कोदण्डमण्डितं वन्दे भक्तानामार्त्तिभञ्जनम् ॥ ६२ ॥
योगीन्द्रज्ञानदीपं च साकारं निर्गुणाश्रयम् ।
मुरारिं मोक्षदं वन्दे निर्लिप्तं दीप्ततेजसम् ॥ ६३ ॥
तत्त्वात्परं परं तत्त्वं दण्डकारण्यपावनम् ।
गृद्ध्रराजप्रियं वन्दे दीनेशं दीनवत्सलम् ॥ ६४ ॥
सीतासुखं सुखासीनं सुमित्रानन्दनाग्रजम् ।
प्रमोददं प्रभापुञ्जं वन्दे पंचवटीस्थितम् ॥ ६५ ॥
रूपयौवनसम्पन्नं राक्षसीचित्तमोहनम् ।
शुद्धं सत्त्वनिधिं वन्दे नीतिशास्त्रविशारदम् ॥ ६६ ॥
विदुषं वेदनिष्णातं पूर्वं कारणकारणम् ।
निष्कलङ्कं कृपालीनं वन्दे युक्तफलप्रदम् ॥ ६७ ॥
अनूपं श्रीवरं शूरं दुर्गमं दीप्तलोचनम् ।
त्रिशिरस्त्रासनं वन्दे खरारिं दूषणारिकम् ॥ ६८ ॥
महाधीरं महावीरं प्रियाप्रेमानुरंजितम् ।
जानकीं हृदि धर्त्तारं वन्दे मायामहार्णवम् ॥ ६९ ॥

अनर्थनाशनं सार्थं समर्थं राक्षसान्तकम् ।
प्रेरकं परमाचिन्त्यं वन्दे पाखण्डखण्डनम् ॥ ७० ॥
अधोक्षजं धराधीशं लोकलीलाविचक्षणम् ।
मृगयाकुशलं वन्दे मायामारीचमर्दनम् ॥ ७१ ॥
नाट्यशीलं क्रियाशीलं सुशीलं लोकलोचनम् ।
कारुण्यकोमलं वन्दे वैदेहीविरहाकुलम् ॥ ७२ ॥
निर्विकारं नराकारं निराकारं निरामयम् ।
निर्भयं निर्भरानन्दं वन्दे निस्सीमवैभवम् ॥ ७३ ॥
निष्क्रियं निलयं नेयं गूढं गौरीशवन्दितम् ।
अनुत्तमं महामार्गं वन्दे सर्वविमोहनम् ॥ ७४ ॥
रसवन्तं रसानन्तं वैदेहीगुणगायकम् ।
ध्यानमुग्धं प्रियाधीनं वन्दे मायामनोहरम् ॥ ७५ ॥
सत्यसन्धं स्मरातीतं सीतान्वेषणतत्परम् ।
महेष्वासं महागोप्यं वन्दे प्रेमप्रपूरितम् ॥ ७६ ॥
दयालुं च दयामूलं भक्ताङ्कं करुणार्णवम् ।
मंजुमुक्तिप्रदं वन्दे जटायोर्धामदायकम् ॥ ७७ ॥
बृहन्नियमं ब्रह्मण्यं कबंधवधपण्डितम् ।
वन्दे विक्रमशालीनं क्रीडागारं कृतागमम् ॥ ७८ ॥
शबरीशर्वरीनाथं शबरीस्नेहसिञ्चितम् ।
प्रेमपुष्पमिलिन्दं च वन्दे प्रेमफलाशिनम् ॥ ७९ ॥
भक्तावासमनावासं भावं भक्तैकसंगिनम् ।
दासदर्शनदातारं वन्दे ब्रह्मर्षिदुर्लभम् ॥ ८० ॥

दिनेशं दीनबंधुं च दीननाथं दयामयम् ।
देवर्षिबोधदातारं वन्दे दासानुरक्षकम् ॥ ८१ ॥
प्रकाशं परमाकाशं पम्पासौन्दर्यदर्शकम् ।
सुग्रीवसुखदातारं वन्दे गम्भीरदर्शनम् ॥ ८२ ॥
शाश्वतं शान्तिभोक्तारं हृषीकेशं हृदिस्थितम् ।
विज्ञानविग्रहं वन्दे विश्वकञ्जविकाशकम् ॥ ८० ॥
अञ्जनीनन्दनानन्दं निर्विकल्पं कलाभृतम् ।
नारायणं नरं वन्दे निधानं मुनिरूपिणम् ॥ ८४ ॥
सुग्रीवसुहृदं सुन्दं सुराधीशं शशिप्रभम् ।
स्वालोकमव्ययालोकं वन्दे सर्वाशये स्थितम् ॥ ८५ ॥
निर्व्यलीकं प्रतीकं च सप्ततालविभेदकम् ।
क्षेप्तारं दुंदुभेरस्थीन् वन्दे सत्यपराक्रमम् ॥ ८६ ॥
अगाधं परमाराध्यं बालिवारणदारणम् ।
भक्तपालं जगत्पालं वन्दे दर्पविमर्दनम् ॥ ८७ ॥
गर्वघ्नं गरिमागारं गोतीतं ज्ञानदायकम् ।
गोपतिं गोगतिं वन्दे गोविन्दं गतिसत्तमम् ॥ ८८ ॥
ताराप्रबोधकर्त्तारं ताराधिपनिभाननम् ।
सुग्रीवराज्यदातारं वन्दे सत्यभृतां वरम् ॥ ८९ ॥
प्रवर्षणे वसन्तं च लक्ष्मणे तत्त्वभाषिणम् ।
भक्तान्भजन्तमभ्रान्तं वन्दे श्रीस्मरणाकुलम् ॥ ९० ॥
मूर्तिमन्तानुरागं च परोक्षे प्रीतिपालकम् ।
एकान्तप्रेमिणं वन्दे भक्तरक्षार्थचिन्तितम् ॥ ९१ ॥

सीतान्वेषणव्यग्रं च प्लवगाधिपशिक्षकम् ।
तेजस्समन्वितं वन्दे सर्वज्ञं सर्वबोधदम् ॥ ९२ ॥
अशोकं शोकनिर्वाणं वानरानीकदर्शकम् ।
मुद्रिकादायिनं वन्दे वायुपुत्रबलप्रदम् ॥ ९३ ॥
कामदं कल्पनातीतं महाकल्पं कलाधरम् ।
सम्पातिपक्षदातारं वन्दे सागरतारणम् ॥ ९४ ॥
अशोकवनिकामध्ये सीताध्याने विराजितम् ।
अचिन्त्यं चिन्त्यसौन्दर्यं वन्दे शक्तीश्वरीप्रियम् ॥ ९५ ॥
विक्रमं चाञ्जनेयस्य संभवं स्वप्नदर्शनम् ।
लंकेशक्लेशदातारं वन्दे लंकाविनाशनम् ॥ ९६ ॥
कृतज्ञं हनुमत्श्रेष्ठं दान्तं शान्तविलोचनम् ।
जगत्प्राणं जनानन्दं वन्दे योगीन्द्रपावनम् ॥ ९७ ॥
महारथिं महाबाहुं दुर्दर्शं दैत्यमर्दनम् ।
कोदण्डस्फालयन्तं च वन्दे लंकाभयंकरम् ॥ ९८ ॥
केशवन्दितपादाब्जं कपीनां नृत्यदर्शकम् ।
कपीनां नयनानन्दं वन्दे सौलभ्यसुन्दरम् ॥ ९९ ॥
सर्वसृष्टिसृजन्तं च सृष्टिकाननमालिनम् ।
कौशलेशकुमारं च वन्दे दीप्तकलेवरम् ॥१००॥
अकारणकृपागारं शरण्यं प्रणपालकम् ।
विभीषणस्य विश्रामं वन्दे लंकाप्रदायकम् ॥ १०१ ॥
सिन्धुशोषणशीलं च सिन्धुदर्पविमर्दनम् ।
निर्मलं निर्ममं वन्दे सागरेणाभिवन्दितम् ॥ १०२ ॥

सागरे सेतुकर्त्तारं सर्वयुद्धविशारदम् ।
सर्वदेवाधिदेवं च वन्दे शंकरसंस्तुतम् ॥ १०३ ॥
सुवेलशिखरारूढं सुग्रीवेण सुशोभितम् ।
सौमित्रिसेवितं वन्दे वायुपुत्रेण सत्कृतम् ॥ १०४ ॥
धन्विनं लोकजेतारं सीतादर्शनकांक्षिणम् ।
भयाय भयदं वन्दे भक्तमोहान्धभंजनम् ॥ १०५ ॥
अमोघास्त्रं भवावासं भक्तवाक्परिपालकम् ।
इक्ष्वाकुनन्दनं वन्दे राक्षसानीकनाशनम् ॥ १०६ ॥
दुर्जयं दुष्क्रमं दुर्गं दुर्धर्षं सुदुरासदम् ।
महादिव्यं महादित्यं वन्दे युद्धभयंकरम् ॥ १०७ ॥
कुंभकर्णनिहन्तारं जटामुकुटमण्डितम् ।
दुर्धरं दैत्यकालं च वन्दे दैत्यनिकन्दनम् ॥ १०८ ॥
लंकेशस्य कृतान्तं च लंकेशशिरकृन्तनम् ।
लंकाध्वंसकरं वन्दे भीमं शस्त्रभृतां वरम् ॥ १०९ ॥
राघवेशं रथासीनं राक्षसाघौघनाशनम् ।
दिव्यायुधधरं वन्दे निर्द्वन्द्वं खलखण्डनम् ॥ ११० ॥
घनरूपं घनानन्दं घनश्यामं घनद्युतिम् ।
घनालोकं घनच्छन्दं वन्दे घोरार्तिनाशनम् ॥ १११ ॥
दशग्रीवनिहन्तारं मायाङ्कं माययाद्भुतम् ।
अनादिनिधनं धन्यं वन्दे रावणदारणम् ॥ ११२ ॥
कालकालं महाकालं कालातीतं कलानिधिम् ।
कैवल्यनिलयं वन्दे श्रीकान्तं शार्ङ्गधारिणम् ॥ ११३ ॥

अनन्तं गुणगम्भीरं स्वच्छन्दं गर्वसूदनम् ।
सहासवदनं देवं वन्दे देवनमस्कृतम् ॥ ११४ ॥
ज्ञानानन्दं चिरानन्दं पूर्णानन्दं महाप्लवम् ।
मोक्षतीर्थं महातीर्थं वन्दे रावणतारणम् ॥ ११५ ॥
दैत्यानामन्तकं वन्दे दैत्यान्तःकरणप्रियम् ।
सुदर्शनं सुधाहासं देवेशं नित्यसुन्दरम् ॥ ११६ ॥
सर्वतन्त्रं स्वतन्त्रं च सीताप्रीतिपरीक्षकम् ।
सीताव्रतं सदाधीनं वन्दे सीतासुशोभितम् ॥ ११७ ॥
कल्पवृक्षं कलामूलं सर्वलोकमनोहरम् ।
हनुमद्धृदयाह्लादं वन्दे गंधर्ववन्दितम् ॥ ११८ ॥
विभीषणाभिषेक्तारं कपिकौतुकदर्शकम् ।
भक्त्या ग्राह्यं सदानन्यं वन्दे लीलाविनोदिनम् ॥ ११९ ॥
व्रतिनो भरतभ्रातुर्दर्शनोत्सुकमानसम् ।
पुष्पके भ्राजमानं च वन्दे दुर्लभदर्शनम् ॥ १२० ॥
पद्मनाभं सुमेघाभं नीरजाभं निरंकुशम् ।
हनुमत्प्रेषकं वन्दे मुनीन्द्रानन्दसागरम् ॥ १२१ ॥
अप्रमेयं मुनिध्येयं सत्त्वस्थं सिंहगामिनम् ।
तुमलं संकुलं वन्दे विस्मयोत्फुल्ललोचनम् ॥ १२२ ॥
विमोदं विमदं वेदं कन्दं चन्द्रमिवोदितम् ।
वशिष्ठायनमन्तं च वन्दे धर्मशिखामणिम् ॥ १२३ ॥
तपोमयं तपोमूर्तिं तपस्विभ्रातृदर्शकम् ।
तमोहरं त्रिकावासं वन्दे प्रेमाश्रुलोचनम् ॥ १२४ ॥

सरोजसकुमारं च सर्वमात्रभिलालितम् ।
प्रीणयन्तं सखीन्वन्दे सर्वामात्यप्रजाप्रियम् ॥ १२५ ॥
चक्रवर्तिसुधाकीर्तिं चक्रवर्त्तिनृपेश्वरम् ।
अयोध्याधिपतिं वन्दे राज्यसिंहासने स्थितम् ॥ १२६ ॥
रमणीयं रसासक्तं किशोरीकान्तिरंजितम् ।
श्रृंगाररसागरं वन्दे रत्नच्छत्रसुशोभितम् ॥ १२७ ॥
सिंहासने समासीनं कोटिसूर्यसमप्रभम् ।
रामामनोहरं हृष्टं वन्दे राघवनन्दनम् ॥ १२८ ॥
राज्यपालनदक्षं च ब्रह्मकोटिप्रजापतिम् ।
प्रेमयज्ञफलं वन्दे राजेन्द्रं राष्ट्ररंजनम् ॥ १२९ ॥
नित्यनाथं निलिम्पेशं नीतं नित्यविहारिणम् ।
निपुणं रत्नमभ्राङ्गं वन्दे कुंचितकुन्तलम् ॥ १३० ॥
सरयूविहरन्तं च कृपालुं कुंकुमाङ्कितम् ।
सीतारूपवने भृङ्गं वन्दे प्रेमप्रफुल्लितम् ॥ १३१ ॥
पुष्पकन्दुकक्रीडन्तं पुष्पगुच्छविभूषितम् ।
प्राणाधारमणुं प्रेष्ठं वन्दे प्रेमप्रदीपकम् ॥ १३२ ॥
निकुंजललितं सङ्गं वसन्तं रागरञ्जितम् ।
मलीनहृदयाद् दूरं वन्दे मायासुधानिधिम् ॥ १३३ ॥
भक्ताक्षिनलिनालन्दं भक्ताह्लादं रसात्मकम् ।
भूदेवं भुवनानन्दं वन्दे भूतिविभूषणम् ॥ १३४ ॥
ज्ञानं स्वच्छमभिव्यक्तं गीतातत्त्वोपदेशकम् ।
तारकं वारकं वन्दे श्रीसेव्यं सुकृतेः परम् ॥ १३५ ॥

सौगन्ध्यदं समाविष्टं संस्तुतं सनकादिभिः ।
रसालं ललनं वन्दे विनीतं प्रकृतेः परम् ॥ १३६ ॥
यज्ञेशं यज्ञकर्त्तारं यज्ञनारायणं युतम् ।
यशस्विनं यथापूर्वं वन्दे ब्रह्माण्डविग्रहम् ॥ १३७ ॥
भुशुण्डिमोहनं गण्यं गूढार्थं गरुडध्वजम् ।
मन्त्रकारं महामंत्रं वन्दे मोहनिकृन्तनम् ॥ १३८ ॥
उग्रं समग्रमात्मज्ञं संग्राह्यं शक्तमग्रिमम् ।
अतंद्रिकमतिक्रान्तं वन्दे वश्यं विकर्षणम् ॥ १३९ ॥
लक्ष्मीशं ललनालक्ष्यं लक्ष्मीलक्ष्मिविवर्धनम् ।
लक्ष्मीलक्षितमात्मीयं वन्दे लीलामहोदधिम् ॥ १४० ॥
नानावतारचर्चारं नानासृष्टिप्रवर्तकम् ।
नटनारायणं वन्दे निरीहं नाट्यकारकम् ॥ १४१ ॥
मत्स्यं कूर्मं वराहं च नृसिंहं बटुवामनम् ।
भार्गवं राघवं कृष्णं वन्दे बुद्धं च कल्किनम् ॥ १४२ ॥
महाविष्णुं महाजिष्णुं सहिष्णुं सर्वतोमुखम् ।
महार्घं मार्मिकं वन्दे महारंभं महाभवम् ॥ १४३ ॥
सखायं गोपबालानां गोपीशं राधिकाधनम् ।
रासेशं ललिताकान्तं वन्दे वंशीमनोहरम् ॥ १४४ ॥
श्रीमालं तुलसीमालं मानं श्रीहृदयालयम् ।
अवधेशं महाशेषं वन्दे शून्यं समापकम् ॥ १४५ ॥
अशेषं हृदयेशं च चक्रेशं शंकरेश्वरम् ।
सर्वेश्वरं धरं वन्दे महामायेश्वरं वरम् ॥ १४६ ॥

अच्युतं भूमिकान्तं च भूरिनाथं विभाजकम् ।
वासुदेवं प्रलम्बारिं वन्दे हंसं हयेश्वरम् ॥ १४७ ॥
विराड्रूपं विमुक्ताङ्कं विश्रब्धं वासवानुजम् ।
सम्वेद्यं सक्षमं वन्दे समष्टिं सृष्टिस्रग्धरम् ॥ १४८ ॥
भक्तानां भक्तिमन्तं च भक्तानां नयनोत्सवम् ।
भक्तानुरक्तमव्यक्तं वन्दे भीष्मं भयापहम् ॥ १४९ ॥
प्रधानं पंचकं पथ्यं प्रश्रयं प्रेमप्रस्थितम् ।
प्रत्ययं प्रेमप्रच्छन्नं वन्दे प्रांशुं प्रलम्बनम् ॥ १५० ॥
रसेशं रसिकाचार्य्यं रामानन्दं रमाकरम् ।
रंचकं रुचिरं वन्दे रूपकं रसितं रतम् ॥ १५१ ॥
परेशं परमायेशं पुराणं पुरुषोत्तमम् ।
पाटवं प्रणवं वन्दे पुण्यश्लोकं प्रतर्दनम् ॥ १५२ ॥
महत्तरं महत्तत्त्वं ज्वलन्तं जलशायिनम् ।
अखण्डं मण्डलं वन्दे प्रचण्डं चण्डविक्रमम् ॥ १५३ ॥
विशालं विशदं विश्वं विचित्रं विश्ववाञ्छितम् ।
विरक्तं विश्रुतं वृन्दं वन्दे व्यूहं वशीकरम् ॥ १५४ ॥
वैकुण्ठं विनयानन्दं माधवं माधवीश्वरम् ।
उमाधवेश्वरं वन्दे महापारं परोक्षितम् ॥ १५५ ॥
धातारं सुषमासारं सारङ्गं सात्वतां पतिम् ।
वरेण्यं वत्सलं वन्दे जगन्मूलं जनार्दनम् ॥ १५६ ॥
अनामयं समाकीर्णं स्वानन्दं स्वरसाश्रयम् ।
श्रीकरं श्रीधरं वन्दे श्रीवासं श्रीकरग्रहम् ॥ १५७ ॥

अमेयममृतत्वेशं विपाकं परमाक्षरम् ।
एकान्तवल्लभं वन्दे ज्योतीरूपमनुग्रहम् ॥ १५८ ॥
अनल्पं सत्यसंकल्पं निष्प्रपञ्चं चराचरम् ।
उपाधिरहितं वन्दे निग्रहं निखिलात्मकम् ॥ १५९ ॥
अद्भुतालयमादेयं सर्वातिगमतीन्द्रियम् ।
इन्दिरामन्दिरं वन्दे ब्रह्मज्योतिः सनातनम् ॥ १६० ॥
लीलातनुं लताश्लिष्टं सुकुमारं कलस्वनम् ।
प्रीतिबद्धं विदग्धं च वन्दे दर्शनदायकम् ॥ १६१ ॥
अद्भुतं कर्मकर्त्तारं सर्वसामर्थ्यशालिनम् ।
व्यासादिवन्दितं वन्दे क्लेशसंस्कारनाशनम् ॥ १६२ ॥
श्रीनाथं सुरतेशं च सुवे वनमालिनम् ।
प्रणयेशं पणं वन्दे प्रवीणं वीक्षणायुधम् ॥ १६३ ॥
भवन्तं भावयन्तं च भ्रामयन्तं भ्रमात्परम् ।
उद्भवं प्रलयं वन्दे मुक्तमोक्षमनोरमम् ॥ १६४ ॥

॥ मुक्तमोक्षमनोरमाय नमः ॥

—: इति :—

11678
अयोध्या

श्रीरामनामसाहस्रं दिव्यं लीलासमन्वितम् ।
यः पठेन्मधुरालापैः प्राप्नुयात्सर्ववाञ्छितम् ॥
श्रीजयरामदेवेन निर्मितं सुन्दरं स्तवम् ।
यः पठेत्कामनां त्यक्त्वा प्राप्नुयाद्रामदर्शनम् ॥

मुद्रक-पं० वैकुण्ठनाथ भार्गव, आनन्दसागर प्रेस, गायघाट, बनारस १.

11827